# अभ्यासवशगं मनः

**अभ्यासवशगं मनः**
**(मन अभ्यास से वश में होता है)**

1. *अर्जुनः उवाच*
*अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः,*
*अनिच्छन्नपि वार्ष्णेय! बलादिव नियोजितः॥1॥*

**हिंदी अनुवाद (Hindi Translation)**

**अर्जुन बोले–** हे कृष्ण! फिर यह मानव न चाहता हुआ भी बलपूर्वक लगाए हुए की भाँति किसके द्वारा प्रेरित होकर पापकर्म करता है।

**अन्वयः (Prose-order)**

**अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः,**
**अनिच्छन्नपि वार्ष्णेय! बलादिव नियोजितः॥1॥**

वार्ष्णेय! अथ केन (i) ...................... अयं पुरुषः (ii) ...................... अपि बलात् (iii) ...................... इव (iv) ...................... चरति।

**मञ्जूषा–** नियोजितः, अनिच्छन्, पापम्, प्रयुक्तः

**उत्तराणि–**(i) प्रयुक्तः (ii) अनिच्छन् (iii) नियोजितः (iv) पापम्

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**शारदा–**वार्ष्णेयः! हे श्रीकृष्ण! हे श्रीकृष्ण (O, Krishna)। **बलात्–**हठात्, बलपूर्वक (By force)। **प्रयुक्तः–**प्रेरितः, प्रेरित (Encouraged)। **अनिच्छन्–**न इच्छन्, न चाहते हुए (Not wishing)।

**संस्कृते भावार्थः (Summary)**

**अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः,**
**अनिच्छन्नपि वार्ष्णेय! बलादिव नियोजितः॥1॥**

**अस्य भावोऽस्ति, यत्–**अर्जुनः (i) ...................... पृच्छति–हे कृष्ण! पुनः अयं (ii) ...................... न इच्छन् अपि (iii) ...................... नियोजितः इव केन (iv) ...................... भूत्वा पापकर्म आचरति?

**मञ्जूषा–** बलपूर्वकम्, श्रीकृष्णं, प्रेरितः, मनुष्यः

**उत्तराणि–**(i) श्रीकृष्णं (ii) मनुष्यः (iii) बलपूर्वकम् (iv) प्रेरितः

**सन्धि-विच्छेदः (Disjoin Sandhi)**

प्रयुक्तोऽयम् – प्रयुक्तः + अयम् (विसर्ग सन्धिः) बलादिव – बलात् + इव (व्यंजन सन्धिः)।
अनिच्छन्नपि – अनिच्छन् + अपि (व्यंजन सन्धिः)।

**समासाः (Compounds)**

वार्ष्णेय – वृष्णिषु जन्म यस्य सः, सम्बोधने (बहुव्रीहिः) अनिच्छन्– न इच्छन् (नञ् तत्पुरुषः)।
पूरुषः – पुर्याम् शेते इति (उपपद तत्पुरुषः)।

**प्रत्ययाः (Suffixes)**

प्रयुक्तः – प्र + युज् + क्त। नियोजितः – नि + युज् + णिच् + क्त। इच्छन् – इष् + शतृ।

www.dreamtopper.in

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

अत्र श्रीकृष्णाय सम्बोधनपदम् किम्?

**(II) पूर्णवाक्येन उत्तरत–**

अनिच्छन् पुरुषः किम् करोति?

**(III) भाषिककार्यम्–**

(*i*) 'करोति' अस्य पर्यायः श्लोकात् एव चित्वा लिखत।

(क) गच्छति (ख) चरति (ग) नियोजितः (घ) प्रयुक्तः

(*ii*) 'अयम्' इति सर्वनामपदस्य प्रयोगः कस्मै अभवत्?

(क) अर्जुनाय (ख) श्रीकृष्णाय (ग) जनाय (घ) पुरुषाय

(*iii*) 'न इच्छन्' इति स्थाने किम् अव्ययपदं प्रयुक्तम्?

(क) अनिच्छन् (ख) अनिच्छन्नपि (ग) नियोजितः (घ) इच्छतः

(*iv*) 'इच्छन्' इति पदे कः प्रत्ययः?

(क) क्त (ख) क्तवतु (ग) शतृ (घ) शानच्

**उत्तराणि–** (I) वार्ष्णेय।

(II) अनिच्छन् अपि पुरुषः पापं करोति।

(III) (*i*) (ख) चरति (*ii*) (घ) पुरुषाय (*iii*) (क) अनिच्छन् (*vi*) (ग) शतृ।

**प्रश्ननिर्माणम्–** (*i*) पुरुषः **पापं** चरति।

(*ii*) **अनिच्छन्नपि** पुरुषः पापं करोति।

(*iii*) पुरुषः एव बलादिव **नियुक्तः** भवति।

**उत्तराणि–**(*i*) किम् (*ii*) कथम् (*iii*) कीदृशः।

**2.** ***श्रीकृष्णः उवाच***

***काम एष क्रोध एष रजोगुणसमुद्भवः।***
***महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥2॥***

**हिंदी अनुवाद (Hindi Translation)**

**श्रीकृष्ण बोले**–रजोगुण से उत्पन्न होने वाला यह काम ही क्रोध है। यह सब कुछ खाने वाला और महापापी है। इसे ही यहाँ (इस संसार में) शत्रु समझो।

**अन्वयं लिखत (Prose-order)**

**काम एष क्रोध एष रजोगुणसमुद्भवः।**
**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥2॥**

रजोगुणसमुद्भवः (*i*) ...................... कामः एषः (*ii*) ...................... महाशनाः (*iii*) ......................। एनम् इह (*iv*) ...................... विद्धि।

**मञ्जूषा–** | क्रोधः, वैरिणं, महापाप्मा, एषः |

**उत्तराणि–**(*i*) एषः (*ii*) क्रोधः (*iii*) महापाप्मा (*iv*) वैरिणं

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**महाशनः**–सर्वभोजी, सब कुछ खाने वाला (Glutton oracious eater)। **महापाप्मा**–महापापी, महापापी (Great sinner)। **विद्धि**–अवगच्छ, जानो (To know)।

**संस्कृते भावार्थः (Summary)**

**काम एष क्रोध एष रजोगुणसमुद्भवः।**
**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥2॥**

अस्य भावोऽस्ति–श्रीकृष्णः (*i*) ...................... अवदत्–रजोगुणात् (*ii*) ...................... अयं कामः क्रोधः च अस्ति। एषः सर्वभोजी (*iii*) ...................... च वर्तते। त्वम् अस्मिन् (शरीरे) एनम् एव (*iv*) ...................... जानीहि।

**मञ्जूषा–** | समुत्पन्नः, शत्रुम्, अर्जुनम्, महापापी |

**उत्तराणि–**(*i*) अर्जुनम् (*ii*) समुत्पन्नः (*iii*) महापापी (*iv*) शत्रुम्

**समासाः (Compounds)**

रजोगुणसमुद्भवः – रजोगुणात् समुद्भवः (पञ्चमी तत्पुरुषः)।
महाशनः – महत् अशनम् यस्य सः (बहुव्रीहिः)।
महापाप्मा – महान् पाप्मा (कर्मधारयः)।

www.dreamtopper.in

**सन्धि-विच्छेदः (Disjoin Sandhi)**

काम एष – कामः + एष। विद्ध्येनम् – विद्धि + एनम्।

महाशनो महापाप्मा – महाशनः + महापाप्मा।

**प्रत्यय (Suffix)**

वैरिणम् – वैर + इन्।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) कामः कस्मात् उत्पन्नः? (*ii*) 'उत्पन्नः' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

**(II) पूर्णवाक्येन उत्तरत–**

महाशनः कः?

**(III) भाषिककार्यम्–**

(*i*) 'महाशनः' कस्य पदस्य विशेषणम्?

(क) जनस्य (ख) वैरिणः (ग) कामस्य (घ) शत्रोः

(*ii*) 'विद्धि' इति पदम् कस्मिन् लकारे अस्ति?

(क) लट् (ख) लोट् (ग) विधिलिङ् (घ) लङ्

(*iii*) अस्मिन् श्लोके अव्ययपदं किम्?

(क) विद्धि (ख) एषः (ग) एनम् (घ) इह

(*iv*) 'एनम्' इति सर्वनामपदस्य प्रयोगः कस्मै अभवत्?

(क) कामाय (ख) शत्रुभ्यः (ग) शत्रवे (घ) जनाय

**उत्तराणि–** (I) (*i*) रजोगुणात् (*ii*) समुद्भवः।

(II) महाशनः कामः क्रोधः च अस्ति।

(III) (*i*) (ग) कामस्य (*ii*) (ख) लोट् (*iii*) (घ) इह (*iv*) (क) कामाय।

**प्रश्ननिर्माणम्–** (*i*) **श्रीकृष्णः** अर्जुनम् उवाच। (*ii*) कामः क्रोधः च **रजोगुणात्** प्रभवतः।

(*iii*) **कामः** एष महापाप्मा भवति। (*iv*) कामः क्रोधः च **जनानां** वैरिणौ भवतः।

(*v*) **कामेन** जनानां नाशो भवति।

**उत्तराणि–**(*i*) कः (*ii*) कस्मात् (*iii*) कः (*iv*) केषाम् (*v*) केन।

***3. शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।***
***कामक्रोधोद्भवं वेगं, स युक्तः स सुखी नरः॥3॥***

**हिंदी अनुवाद (Hindi Translation)**

जो (मनुष्य) शरीर छूटने से पहले काम और क्रोध से उत्पन्न वेग को इस संसार में ही सहन करने में समर्थ है, वह मनुष्य योगी है, वह सुखी है।

**अन्वयं लिखत (Prose-order)**

**शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।**
**कामक्रोधोद्भवं वेगं, स युक्तः स सुखी नरः॥3॥**

यः शरीरविमोक्षणात् (*i*) .................... कामक्रोधोद्भवं (*ii*) .................... इह एव सोढुं (*iii*) .................... सः नरः (*iv*) .................... सः सुखी (भवति)।

**मञ्जूषा–** | वेगम्, युक्तः, प्राक्, शक्नोति |

**उत्तराणि–**(*i*) प्राक् (*ii*) वेगम् (*iii*) शक्नोति (*iv*) युक्तः

**शब्दार्थाः (Word–meanings Sanskrit to Sanskrit, Hindi and English)**

**प्राक्**–पूर्वम्, पहले (Before)। **सोढुम्**–सहनं कर्तुम्, सहन करने में (For bearing)। **युक्तः**–योगी, योगी (Sage, seer)। **इह**–अस्मिन् संसारे, इस संसार में (In this world)। **शरीरविमोक्षणात्**–मृत्योः, मृत्यु के (Of death)।

**संस्कृते भावार्थः (Summary)**

**शक्तोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।**
**कामक्रोधोद्भवं वेगं, स युक्तः स सुखी नरः॥3॥**

अस्य श्लोकस्य भावोऽस्ति–यः मनुष्यः शरीरस्य (*i*) .................. पूर्वं कामात् क्रोधात् च समुत्पन्नं (*ii*) .................. अत्रैव (*iii*) .................. समर्थः अस्ति सः जनः (*iv*) .................. अस्ति सः च सुखी नरः अस्ति।

www.dreamtopper.in

**मञ्जूषा–** | वेगं, योगी, मृत्योः, सोढुं |

**उत्तराणि–**(*i*) मृत्योः (*ii*) वेगं (*iii*) सोढुं (*iv*) योगी

**समासाः (Compounds)**

शरीरविमोक्षणात् – शरीरस्य विमोक्षणात् (षष्ठी तत्पुरुषः)।
कामक्रोधोद्भवं – कामात् क्रोधात् च उद्भवं (पञ्चमी तत्पुरुषः)।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

शक्नोतिहैव – शक्नोति + इह (दीर्घः) + एव (वृद्धि सन्धिः)।
स युक्तः – सः + युक्तः (विसर्ग सन्धिः)।
कामक्रोधोद्भवं – कामक्रोध + उद्भवं (गुण सन्धिः)।
स सुखी – सः + सुखी (विसर्ग सन्धिः)।

**प्रत्ययाः (Suffixes)**

सोढुं – सह् + तुमुन्। सुखी – सुख + इन्। युक्तः – युज् + क्त।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) वेगम् कस्मात् उद्भवति? (*ii*) 'योगी' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

**(II) पूर्णवाक्येन उत्तरत–**

सुखी कः भवति?

**(III) भाषिककार्यम्–**

(*i*) 'पूर्वम्' अस्य पर्यायः श्लोकात् एव चित्वा लिखत।
(क) प्राक् (ख) यः (ग) युक्तः (घ) सुखी

(*ii*) 'सुखी नरः' इति अनयोः पदयोः विशेष्यपदम् किम्?
(क) सुख (ख) सुखी (ग) नरः (घ) नर

(*iii*) 'अत्रैव' इति अर्थे किम् अव्ययपदं प्रयुक्तम्?
(क) इह (ख) इहैव (ग) ईहैव (घ) ईहेव

(*iv*) 'शक्नोति' इति क्रियायाः कर्तृपदं किम्?
(क) सः (ख) नरः (ग) युक्तः (घ) यः

**उत्तराणि–** (I) (*i*) कामात् (*ii*) युक्तः।
(II) (*i*) यः शरीर-विमोक्षणात् प्राक् कामक्रोधोद्भवम् वेगं सोढुं शक्नोति, सः नरः सुखी भवति।
(III) (*i*) प्राक् (*ii*) (ग) नरः (*iii*) (ख) इहैव (*iv*) (घ) यः।

**प्रश्ननिर्माणम्–** (*i*) **युक्तः** नरः सुखी भवति।
(*ii*) यः **शरीरस्य** विमोक्षणात् पूर्वं कामं क्रोधं च सहते।
(*iii*) सः नरः **युक्तः** भवति।
(*iv*) **अस्मिन् संसारे** एव नरः कामं क्रोधं च सहते।

**उत्तराणि–**(*i*) कीदृशः (*ii*) कस्य (*iii*) कीदृशः (*iv*) कुत्र।

4. ***ध्यायतः विषयान् पुंसः संगस्तेषूपजायते।***
***सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते॥4॥***

**हिंदी अनुवाद (Hindi Translation)**

विषयों का ध्यान करने से उनमें आसक्ति उत्पन्न होती है। आसक्ति से काम उत्पन्न होता है। काम से क्रोध उत्पन्न होता है।

www.dreamtopper.in

**अन्वयं लिखत (Prose-order)**

**ध्यायतः विषयान् पुंसः संगस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते॥4॥**

विषयान् (*i*) ...................... पुंसः तेषु (*ii*) ...................... उपजायते। सङ्गात् (*iii*) ...................... सञ्जायते। (*iv*) ...................... क्रोधः अभिजायते।

**मञ्जूषा–** संगः, कामः, कामात्, ध्यायतः

**उत्तराणि–**(*i*) ध्यायतः (*ii*) संगः (*iii*) कामः (*iv*) कामात्

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**पुंसः**–मानवस्य, मानव की (Of man)। **सङ्गः**–आसक्तिः, लगाव (Attachment)।

**संस्कृते भावार्थः (Summary)**

**ध्यायतः विषयान् पुंसः संगस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते॥4॥**

अस्य श्लोकस्य भावोऽयम्–सासांरकविषयान् भोगविलासादि–पदार्थान् (*i*) ...................... मनुष्यस्य तेषु विषयेषु (*ii*) ...................... भवति। आसक्तेः एव (*iii*) ...................... उद्भवति, कामात् च क्रोधः (*iv*) ...................... भवति।

**मञ्जूषा–** ध्यायतः, कामः, उत्पन्नः, आसक्तिः

**उत्तराणि–**(*i*) ध्यायतः (*ii*) आसक्तिः (*iii*) कामः (*iv*) उत्पन्नः।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

संगस्तेषूपजायते – संगः + तेषु + उपजायते (विसर्ग सन्धिः, दीर्घ सन्धि)। अन्तर्हितः– अन्तः + हितः (विसर्ग सन्धिः)।
क्रोधोऽभिजायते – क्रोधः + अभिजायते (विसर्ग सन्धिः)। सञ्जायते – सम् + जायते (परसवर्ण सन्धिः)।

**प्रत्ययः (Suffix)**

ध्यायतः – ध्यै + तसिल्।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

कान् ध्यायतः संगः उपजायते?

**(II) पूर्णवाक्येन उत्तरत–**

कामात् किम् उपजायते?

**(III) भाषिककार्यम्–**

(*i*) श्लोकात् 'उपजायते' पदस्य पर्याय चित्वा लिखत।
(क) ध्यायतः (ख) उत्पद्यते (ग) उपजायते (घ) अभिजायते

(*ii*) पुंसः इति पदे का विभक्तिः?
(क) षष्ठी (ख) प्रथमा (ग) द्वितीया (घ) चतुर्थी

(*iii*) 'सञ्जायते' इति पदे का मूलधातुः?
(क) ज्ञा (ख) जाय् (ग) जन् (घ) जन्म

(*iv*) 'ध्यायतः' इति कस्य पदस्य विशेषणम्?
(क) विपणायाम् (ख) पुंसः (ग) जनस्य (घ) संमस्य

**उत्तराणि–** (I) विषयान्।
(II) कामात् क्रोधः उपजायते।
(III) (*i*) अभिजायते (*ii*) (क) षष्ठी (*iii*) (ग) जन् (*iv*) (ख) पुंसः।

www.dreamtopper.in

**प्रश्ननिर्माणम्–** (*i*) **जनः** विषयान् ध्यायति। (*ii*) तदा तेषु तस्य **संगतिः** उपजायते। (*iii*) **संगात्** कामः संजायते। (*iv*) कामात् **क्रोधस्य** जन्म भवति।

**उत्तराणि–**(*i*) कः (*ii*) का (*iii*) कस्मात् (*iv*) कस्य।

**5. *क्रोधाद्भवति संमोहः सम्मोहात्स्मृतिविभ्रमः।***
***स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥5॥***

## हिंदी अनुवाद (Hindi Translation)

क्रोध से सम्मोह, सम्मोह से स्मृतिविभ्रम, स्मृति क्षीण होने से बुद्धि का नाश होता है और बुद्धि के नाश से मनुष्य नष्ट हो जाता है।

## अन्वयं लिखत (Prose-order)

**क्रोधाद्भवति संमोहः सम्मोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥5॥**

क्रोधात् (*i*) .......................... सम्मोहात् (*ii*) .......................... स्मृतिभ्रंशात् (*iii*) .......................... भवति, बुद्धिनाशात् (*iv*) ..........................।

**मञ्जूषा–** | स्मृतिविभ्रमः, बुद्धिनाशः, उपश्यति, सम्मोहः |

**उत्तराणि–**(*i*) सम्मोहः (*ii*) स्मृतिविभ्रमः (*iii*) बुद्धिनाशः (*iv*) प्रणश्यति

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**सम्मोहः**–उद्विग्नता (Infatuation)। **बुद्धिनाशात्**–मतिनाशात्, बुद्धि के नाश से (By destruction of senses)।

## संस्कृते भावार्थः (Summary)

**क्रोधाद्भवति संमोहः सम्मोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥5॥**

अस्य भावोऽस्ति यत्–क्रोधात् (*i*) ...................... उद्भवति। उद्विग्नतायाः (*ii*) ...................... विनाशः भवति। स्मृतेः विनाशात् (*iii*) ...................... नाशः भवति बुद्धेः (*iv*) ...................... च मनुष्यः विनश्यति।

**मञ्जूषा–** | स्मृतेः, विनाशात्, उद्विग्नता, बुद्धेः |

**उत्तराणि–**(*i*) उद्विग्नता (*ii*) स्मृतेः (*iii*) बुद्धेः (*iv*) विनाशात्।

## समासाः (Compounds)

स्मृतिविभ्रमः – स्मृतेः विभ्रमः (षष्ठी तत्पुरुषः)। बुद्धिनाशः – बुद्धेः नाशः (षष्ठी तत्पुरुषः)।
स्मृतिभ्रंशात् – स्मृतेः भ्रंशः, तस्मात् (षष्ठी तत्पुरुषः)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

क्रोधाद्भवति – क्रोधात् + भवति (व्यंजनसन्धिः)।
स्मृतिभ्रंशाद्बुद्धिनाशो – स्मृतिभ्रंशात् + बुद्धिनाशः (व्यंजनसन्धिः)।

## प्रत्ययाः (Suffixes)

स्मृतिः – स्मृ + क्तिन्। बुद्धिः – बुध् + क्तिन्।

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) क्रोधात् किम् उद्भवति? (*ii*) मनुष्यस्य विनाशस्य कारणम् किम्?

www.dreamtopper.in

**(II) पूर्णवाक्येन उत्तरत–**

बुद्धिनाशात् किम् भवति?

**(III) भाषिककार्यम्–**

(*i*) 'विनश्यति' इत्यर्थे अत्र किम् पदम् प्रयुक्तम्?

(क) उद्भवति (ख) जायते (ग) प्रणश्यति (घ) प्रभवति

(*ii*) 'भवति' पदस्य अत्र कोऽर्थः?

(क) उत्पन्नः भवति (ख) उपपन्नः भवति (ग) जायते (घ) प्राणश्यति

(*iii*) 'प्रणश्यति' इति पदे का मूलधातुः?

(क) णश् (ख) नश् (ग) प्रणश् (घ) णश्च्

(*iv*) 'निर्माणम्' इति पदस्य कः विपर्ययः आगतः?

(क) नाशः (ख) बुद्धिः (ग) संमोहः (घ) विभ्रमः

**उत्तराणि–** (I) (*i*) सम्मोहः (*ii*) क्रोधः।

(II) बुद्धिनाशात् मनुष्यः प्रणश्यति।

(III) (*i*) (ग) प्रणश्यति (*ii*) (क) उत्पन्नः भवति (*iii*) (ख) नश् (*iv*) (क) नाशः।

**प्रश्ननिर्माणम्–** (*i*) **क्रोधात्** संमोहः भवति? (*ii*) **स्मृति-विभ्रमः** सम्मोहात् जायते।

(*iii*) स्मृति भ्रंशात् **बुद्धेः** नाशः भवति। (*iv*) बुद्धिनाशात् **जनानाम्** विनाशः भवति।

**उत्तराणि–**(*i*) कस्मात् (*ii*) कः (*iii*) कस्याः (*iv*) केषाम्

**6. *तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ!***
***पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥6॥***

## हिंदी अनुवाद (Hindi Translation)

हे भरतवंशियों में श्रेष्ठ अर्जुन! इसलिए तुम सबसे पहले इन्द्रियों को वश में करके ज्ञान-विज्ञान का नाश करने वाले इस महापापी को वश में करो या इसका विनाश करो।

## अन्वयं लिखत (Prose-order)

**तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ!**
**पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥6॥**

भरतर्षभ! तस्मात् (*i*) ...................... आदौ इन्द्रियाणि (*ii*) ...................... ज्ञानविज्ञान (*iii*) ...................... एनम् (*iv*) ...................... हि प्रजहि।

**मञ्जूषा–** नाशनम्, त्वम्, पाप्मानम्, नियम्य

**उत्तराणि–**(*i*) त्वम् (*ii*) नियम्य (*iii*) नाशनम् (*iv*) पाप्मानम्।

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**नियम्य–**शांत कृत्वा, शांत करके (To pacify)। **भरतर्षभ!** हे अर्जुन!, हे अर्जुन (O! Arjuna)। **प्रजहि–**वशीकुरु / विनाशय, वश में कर लो (Keep in control)। **आदौ–**आरंभ में (In the starting)। **पाप्मानम्–**पापिनम्, पापी को (To dirty)।

## संस्कृते भावार्थः (Summary)

**तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ!**
**पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥6॥**

अस्य भावो वर्तते–भगवान् श्रीकृष्णः (*i*) ...................... उपदिशति यत् हे भरतवंशे उत्पन्न अर्जुन! कामक्रोधौ: बुद्धेः (*ii*) ...................... प्रमुखे कारणे स्तः। अतः तस्मात् कारणात् त्वम् आरम्भे एव (*iii*) ...................... नियम्य ज्ञानस्य विज्ञानस्य च विनाशकम् एनम् (*iv*) ...................... कामं क्रोधम् च विनाशय।

www.dreamtopper.in

**मञ्जूषा–** विनाशस्य, पाप्मानं, अर्जुनम्, इन्द्रियाणि

**उत्तराणि–**(*i*) अर्जुनम् (*ii*) विनाशस्य (*iii*) इन्द्रियाणि (*iv*) पाप्मानं

## समासाः (Compounds)

ज्ञानविज्ञाननाशनम् – ज्ञानस्य विज्ञानस्य च नाशनम् (षष्ठी तत्पुरुषः)।
पाप्मानम् – पापस्य रूपम् (षष्ठी तत्पुरुषः)।
भरतर्षभ! – भरतवंशे ऋषभः इव, सम्बोधने (कर्मधारयः)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

इन्द्रियाण्यादौ – इन्द्रियाणि + आदौ (यणसन्धिः)। हयेनम् – हि + एनम् (यणसन्धिः)।

## प्रत्ययः (Suffix)

नियम्य – नि + यम् + ल्यप्।

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) 'भरतर्षभ' पदम् कस्य सम्बोधनम्? (*ii*) ज्ञानस्य विज्ञानस्य च नाशकः कः वर्तते?

**(II) पूर्णवाक्येन उत्तरत–**

आदौ कानि वशीकरणीयानि?

**(III) भाषिककार्यम्–**

(*i*) 'पाप्मानं' पदम् कस्य विशेषणम्?
(क) कामस्य (ख) विचारस्य (ग) मनसः (घ) आत्मनः
(*ii*) 'प्रजहि' इति पदे कः लकारः?
(क) लङ् लकारः (ख) विधिलिङ् लकारः (ग) लोट् लकारः (घ) लट् लकारः
(*iii*) 'आरम्भे' इति अर्थे किं पदं प्रयुक्तम्?
(क) यादौ (ख) आदौ (ग) प्रजहि (घ) स्येनम्
(*iv*) 'त्वम्' इति सर्वनामपदस्य प्रयोगः कस्मै अभवत्?
(क) श्रीकृष्णाय (ख) कामाय (ग) क्रोधाय (घ) अर्जुनाय (भरतर्षभाय)

**उत्तराणि–** (I) (*i*) अर्जुनस्य (*ii*) कामः।
(II) आदौ इन्द्रियाणि वशीकरणीयानि।
(III) (*i*) (क) कामस्य (*ii*) (ग) लोट् लकारः (*iii*) (ख) आदौ (*iv*) (घ) अर्जुनाय (भरतर्षभाय)।

**प्रश्ननिर्माणम्–** (*i*) इदम् उपदेशं श्रीकृष्णः **अर्जुनाय** यच्छति। (*ii*) कामः **ज्ञानविज्ञाननाशकः** भवति।
(*iii*) इन्द्रियाणि **आदौ** एव वशीकरणीयानि। (*iv*) **पाप्मानं** कामं त्यक्त्वा एव ज्ञानं जायते।

**उत्तराणि–**(*i*) कस्मै (*ii*) कीदृशः (*iii*) कदा (*iv*) कीदृशम्।

***7. अर्जुनः उवाच***
***चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम्।***
***तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥7॥***

## हिंदी अनुवाद (Hindi Translation)

**अर्जुन बोले**–हे कृष्ण! मन अत्यधिक चंचल एवं शरीर इन्द्रियों को मथ देनेवाला (व्याकुल करने वाला) है। मैं इसे वश में करना वायु के समान बहुत कठिन मानता हूँ।

www.dreamtopper.in

### अन्वयं लिखत (Prose-order)

**चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम्।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥7॥**

कृष्ण! (*i*) ...................... हि चञ्चलम् (*ii*) ...................... बलवद् दृढम् (चास्ति)। अहम् तस्य (*iii*) ...................... वायोः इव (*iv*) ...................... मन्ये।

**मञ्जूषा–** | प्रमाथि, सुदुष्करम्, निग्रहं, मनः |

**उत्तराणि–**(*i*) मनः (*ii*) प्रमाथि (*iii*) निग्रहं (*iv*) सुदुष्करम्

### शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**प्रमाथि–**प्रमथनशीलम्, मथने वाला (Which causes physical or sensory turmoil)। **निग्रहम्–**वशीकरणम् वश में करने को (Control)। **सुदुष्करम्–**अतीव कठिनम्, अति कठिन (Very hard)।

### संस्कृते भावार्थः (Summary)

**चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम्।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥7॥**

अस्य भावोऽस्ति यत्–अर्जुनः भगवन्तं (*i*) ...................... कथयति यत् हे श्रीकृष्ण! मनः निश्चयेन चञ्चलम् (*ii*) ...................... विषयेषु च शक्तिमत् भवति। अतः अहं तस्य चलायमानस्य (*iii*) ...................... नियन्त्रणं (*iv*) ...................... इव अतिकठिनम् जानामि।

**मञ्जूषा–** | प्रमाथि, वायोः, श्रीकृष्णं, मनसः |

**उत्तराणि–**(*i*) श्रीकृष्णं (*ii*) प्रमाथि (*iii*) मनसः (*iv*) वायोः।

### सन्धि-विच्छेदः (Disjoin Sandhi)

चञ्चलं – चम् + चलम् (परसवर्ण सन्धिः)। तस्याहम् – तस्य + अहम् (दीर्घ सन्धिः)।
वायोरिव – वायोः + इव (विसर्ग सन्धिः)। बलवद्दृढम् – बलवत् + दृढम् (व्यंजन सन्धिः)

### समासाः (Compounds)

बलवद्दृढम् – बलवत्सुदृढम् (सप्तमी तत्पुरुषः)।

### प्रत्ययः (Suffix)

प्रमाथि – प्र + मथ + इन्।

### प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) मनः कीदृशम् अस्ति? (*ii*) अत्र सम्बोधनपदम् किम्?

**(II) पूर्णवाक्येन उत्तरत–**

कः कस्य निग्रहं सुदुष्करम् मन्यते?

**(III) भाषिककार्यम्–**

(*i*) 'मनः' अस्य विशेष्य पदस्य विशेषणपदं किम्?
(क) चञ्चलम् (ख) निग्रहम् (ग) मन्ये (घ) तस्याहम्

(*ii*) 'चञ्चलम्' इति पदस्य सन्धिच्छेदं कृत्वा लिखत।
(क) चन् + चलम् (ख) चम् + चलम् (ग) चञ् + चलम् (घ) चङ् + चलम्

(*iii*) 'मन्ये' इति क्रियायाः कर्तृपदं किम्?
(क) त्वम् (ख) यूयम् (ग) युवाम् (घ) अहम्

www.dreamtopper.in

(*iv*) 'बलवद्दृढम्' इति कस्य पदस्य विशेषणम्?

(क) मनसः (ख) चञ्चलस्य (ग) प्रमाथिनः (घ) सुदुष्करस्य

**उत्तराणि–** (I) (*i*) चञ्चलम् (*ii*) कृष्ण!

(II) अर्जुनः मनसः निग्रहं सुदुष्करम् मन्यते।

(III) (*i*) (क) चञ्चलम् (*v*) (ख) चम् + चलम् (*vi*) (घ) अहम् (*vii*) (क) मनसः।

**प्रश्ननिर्माणम्–** (*i*) **अर्जुनः** श्रीकृष्णं सम्बोधयति। (*ii*) मनः **प्रमाथि** वर्तते।

(*iii*) **मनसः** निग्रहम् अतीव कठिनम् अस्ति। (*iv*) **मनः** अतीव चञ्चलं वर्तते।

**उत्तराणि–**(*i*) कः (*ii*) कीदृशम् (*iii*) कस्य (*iv*) किम्।

**8. *श्रीकृष्णः उवाच***

***असंशयं महाबाहो! मनो दुर्निग्रहं चलम्।***
***अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते॥8॥***

## हिंदी अनुवाद (Hindi Translation)

**श्रीकृष्ण बोले**–हे विशाल भुजाओं वाले, कुंतीपुत्र अर्जुन! निश्चय ही मन कठिनाई से वश में किया जाने वाला और चंचल है। इसे अभ्यास और वैराग्य से वश में किया जा सकता है।

## अन्वयं लिखत (Prose-order)

**असंशयं महाबाहो! मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते॥8॥**

महाबाहो! (*i*) ........................ असंशयम् मनः (*ii*) ........................ चलम् (एतत्) तु (*iii*) ........................ वैराग्येण च (*iv*) ........................।

**मञ्जूषा–** | दुर्निग्रहं, गृह्यते, अभ्यासेन, कौन्तेय |

**उत्तराणि–**(*i*) कौन्तेय (*ii*) दुर्निग्रहं (*iii*) अभ्यासेन (*iv*) गृह्यते।

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**दुर्निग्रहम्**–यस्य वशीकरणं कठिनम्, जिसको वश में करना कठिन हो (Difficult to control)। **महाबाहोः–**हे विशाल भुज! हे विशाल भुजाओं वाले (A man of strength)।

## संस्कृते भावार्थः (Summary)

**असंशयं महाबाहो! मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते॥8॥**

**अस्य भावोऽस्ति यत्**–श्रीकृष्णः (*i*) ................ शिक्षयति यत् हे महाबाहो! हे कुन्ती पुत्र अर्जुन! (*ii*) ................ चञ्चलस्य मनसः नियन्त्रणम् वशीकरणम् वा (*iii*) ................ भवति। परन्तु हे कौन्तेय! वारम्वारम् (*iv*) ................ विषयान् प्रति वैराग्यभावेन च मनः वशं गच्छति।

**मञ्जूषा–** | अभ्यासेन, अर्जुनं, निस्संदेहम्, अतिकठितनं |

**उत्तराणि–**(*i*) अर्जुनं (*ii*) निस्संदेहम् (*iii*) अतिकठिनं (*iv*) अभ्यासेन

## समासः (Compounds)

असंशयम् – न संशयम् (नञ् तत्पुरुषः)। महाबाहो – महान्तौ बाहू यस्य सः, सम्बोधने (बहुव्रीहिः)।

www.dreamtopper.in

**सन्धि-विच्छेद: (Disjoin Sandhi)**

दुर्निग्रहम् – निग्रहम् (विसर्गसन्धि:)।

**प्रश्ना: (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) अत्र सम्बोधनपदम् किं प्रयुक्तम्? (*ii*) अभ्यासेन वैराग्येण च किम् वशीक्रियते?

**(II) पूर्णवाक्येन उत्तरत–**

मन: कथम् गृह्यते।

**(III) भाषिककार्यम्–**

(*i*) अत्र अव्ययपदम् किम्?

(क) मनो (ख) च (ग) तु (घ) असंशयं

(*ii*) 'मन:' अस्य विशेषणपदं श्लोकात् एव चित्वा लिखत।

(क) दुर्निग्रहं (ख) असंशयं (ग) अभ्यासेन (घ) महाबाहो

(*iii*) 'चलम्' इति कस्य विशेष्यपदस्य विशेषणम्?

(क) अर्जुनस्य (ख) श्रीकृष्णस्य (ग) शरीरस्य (घ) मनस:

(*iv*) 'कौन्तेय!' इति पदं कस्मै आगतम्?

(क) श्रीकृष्णाय (ख) इन्द्रियाय (ग) अर्जुनाय (घ) शरीराय

**उत्तराणि–** (I) (*i*) महाबाहो (*ii*) मन:।

(II) मन: अभ्यासेन वैराग्येण च गृह्यते।

(III) (*i*) (ख) च (*ii*) (क) दुर्निग्रहं (*iii*) (घ) मनस: (*iv*) (ग) अर्जुनाय।

**प्रश्ननिर्माणम्–** (*i*) मन: असंशयं **तीव्रगामी** वर्तते।

(*ii*) **एतत्** कठिनतया वशीक्रियते।

(*iii*) मनस: **अभ्यासेन वैराग्येण च** वशीकरणं भवति।

(*iv*) विषयान् प्रति **आसक्तिं** न करणमेव वैराग्यं वर्तते।

**उत्तराणि–**(*i*) कीदृशम् (*ii*) किम् (*iii*) काभ्याम् (*iv*) काम्।

## पाठ्यपुस्तकस्य अभ्यास:
## (अनुप्रयोग:)

**1. अधोलिखितप्रश्नानाम् उत्तरम् एकपदेन दीयताम् (मौखिक-अभ्यासार्थम्)।**

(क) 'वार्ष्णेय' इति सम्बोधनं कस्मै प्रयुक्तम?

(ख) 'न इच्छन् अपि' इत्यस्य स्थाने किं पदं श्लोके प्रयुक्तम्?

(ग) काम: कस्मात् गुणात् संभवति?

(घ) 'ध्यायत:' पदं कस्य पदस्य विशेषणम्?

(ङ) कानि वशे कृत्वा नर: कामं नाशयितु शक्नोति?

(च) क: ज्ञानविज्ञाननाशक:?

(छ) मन: वशीकर्तुम् किं कर्तव्यम्?

(ज) केषु आसक्ति: न कर्तव्या?

**उत्तराणि–** (क) श्रीकृष्णाय (ख) अनिच्छन्नपि (ग) सङ्गात् (घ) पुंस: (ङ) इन्द्रियाणि

(च) काम: (ख) अभ्यासम् (ज) विषयेषु।

**2. स्थूलपदानि आश्रित्य प्रश्ननिर्माणं कुरुत–**

(क) मनुष्य: **कामेन** प्रयुक्त: एव पापस्य आचरणं करोति।

www.dreamtopper.in

(ख) कामः एव **क्रोधं** जनयति।
(ग) काम एव **अस्माकं** शत्रुः।
(घ) यः क्रोधस्य वेगं जीवने सहते स **सुखी** नरः।
(ङ) **विषयाणाम्** उपभोगेन तेषु आसक्तिः जायते।
(च) **मनसः** निग्रहः वायोः इव कठिनः।
(छ) **कामः** ज्ञानस्य विज्ञानस्य च नाशं करोति।
(ज) कामस्य नाशाय **इन्द्रियाणि** वशे करणीयानि।

**उत्तराणि**– (क) केन? (ख) कम्? (ग) केषाम्? (घ) कीदृशः (ङ) केषाम्?
(च) कस्य? (छ) कः? (ज) कानि?

**3. स्थूलानि सर्वनामपदानि कस्मै प्रयुक्तानि?**

**यथा– केन** प्रयुक्तः पुरुषः — कामेन इति पदाय/कामाय/कामस्य कृते

(क) **एनं** ज्ञानविज्ञाननाशनं प्रजहि ..........................
(ख) **अहं** मनसः निग्रहं दुष्करं मन्ये ..........................
(ग) **तेषु** सङ्गो उपजायते। ..........................
(घ) **एष** रजोगुणसमुद्भवः ..........................
(ङ) **त्वम्** आदौ इन्द्रियाणां नियमनं कुरु ..........................

**उत्तराणि**– (क) कामाय (ख) अर्जुनाय (ग) विषयेभ्यः (घ) कामाय (ङ) अर्जुनाय।

**4. श्लोकात् समुचितं पदं विचित्य अन्वये रिक्तस्थानानि पूरयत–**

(क) यः शरीरविमोक्षणात् .............. कामक्रोधोद्भवं .............. इह एव .............. शक्नोति स .............. युक्तः स सुखी (भवति)।
(ख) .............. ध्यायतः पुंसः तेषु .............. उपजायते। सङ्गात् .............. सञ्जायते। .............. क्रोधः अभिजायते।
(ग) कृष्ण! मनः हि .............., बलवद्दृढं ..............। अहं तस्य निग्रहं .............. इव दुष्करम् ..............।
(घ) ..............! तस्मात् त्वम् आदौ .............. नियम्य .............. एनं पाप्मानं हि ..............।

**उत्तराणि**– (क) प्राक्, वेगम्, सोढुम्, नरः। (ख) विषयान्, संगः, कामः, कामात्।
(ग) चञ्चलम्, प्रमाथि, वायोः, मन्ये। (घ) भरतर्षभ, इन्द्रियाणि, ज्ञानविज्ञाननाशनम्, प्रजहि।

**5. कक्षायां द्वौ बालौ, अर्णवः ईशानः च इमं पाठम् आधृत्य वार्त्तालापं कुरुतः।**

पाठं पठित्वा एतयोः एषः संवादः पूर्यताम्।

**अर्णवः** जानासि! कः नरः सुखी?
**ईशानः** आम्! .................. वेगं .................. शक्नोति।
**अर्णवः** विषयान् ध्यायतः नरस्य किं भवति?
**ईशानः** विषयान् .................. नरस्य तेषु ..................।
**अर्णवः** सङ्गात् कः जायते?
**ईशानः** ..................................
**अर्णवः** सम्मोहात् कः सञ्जायते?
**ईशानः** ..................................
**अर्णवः** स्मृतिभ्रंशात् किं प्रभवति?
**ईशानः** ..................................

**अर्णवः** नरः कस्मात् प्रणश्यति?
**ईशानः** बुद्धि – ..............................
**अर्णवः** बुद्धिनाशस्य मूलं किम्?
**ईशानः** –विषयेषु ..................।
**अर्णवः** –विषयसङ्गः किमर्थं न कर्तव्यः?
**ईशानः** –येन .................. नाशः न भवेत्।

**उत्तराणि**– यः कामक्रोधोद्भवं, सोढुम्। ध्यायतः, सङ्गः उपजायते। कामः क्रोधः च। स्मृतिविभ्रमः। बुद्धिनाशः। नाशात्। संगः। मनुष्यस्य।

**6. अशुद्ध कथनं (✗) इति चिह्नेन दर्शयत–**

**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।**

(क) भोः अर्जुन! इदं मनः चञ्चलं, दुःखेन निग्रहीतुं शक्यम्।
(ख) चञ्चलमपि मनः सततम् अभ्यासेन वशीकर्तुं शक्यते। या क्रिया पुनः पुनः क्रियते सः अभ्यासः कथ्यते। मनसः वशीकरणाय निरंतरं या साधना क्रियते सः अभ्यासः एव।
(ग) सांसारिकभोगाः नश्वराः अतः एतेषां पुनः पुनः चिन्तनेन तेषु विरक्तिः जायते। एषा विरक्तिः (वैराग्यम्) एव मनः वशीकर्तुं शक्नोति।
(घ) हे कुन्तीपुत्र! सततं अभ्यासेन सांसारिकभोगान् प्रति वैराग्येण च मनः वशं गच्छति।

**उत्तराणि**– (क) ✗ (ख) ✗ (ग) ✗ (घ) ✓

www.dreamtopper.in

**7. अस्मिन् वृक्षे कानिचित् त्याज्यानि कानिचित् च फलानि ग्राह्याणि। ग्राह्याणां फलानां नामानि अधः लिखत।**




..............................................................................................................................

..............................................................................................................................

..............................................................................................................................

..............................................................................................................................

**उत्तराणि**–सुस्मृतिः, पुण्यम्, परोपकारः, सत्यम्, ज्ञानम्, शान्तिः, विवेकः जागृतिः।

**8. 'जन्' धातोः मूलकारणे 'भू' धातोः च उत्पत्तिस्थाने पंचमीविभक्तिः प्रयुज्यते।**

**यथा**– 1. क्रोधात् सम्मोहः जायते।

2. हिमालयात् गङ्गा उद्भवति।

**कस्मात् कः जायते? इति पाठम् आधृत्य अधः रिक्तकोष्ठकानि पूरयत**–

**यथा**–

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| संगात् | कामः | जायते | | | | | |
| | कामात् | क्रोधः | जायते | | | | |
| | | | | जायते | | | |
| | | | | | जायते | | |
| | | | | | | जायते | |
| | | | | | | | प्रणश्यति |

**उत्तराणि**– क्रोधात् सम्मोहः जायते।
सम्मोहात् स्मृतिविभ्रमः जायते।
स्मृतिभ्रंशात् बुद्धिनाशः जायते।
बुद्धिनाशात् नरः प्रणश्यति।

www.dreamtopper.in

**9. मञ्जूषायाः विचित्य अधोलिखित-क्रियापदानाम् अर्थान् लिखत**–

| **अर्हति, जानीहि, करोति, उद्भवति, अवगच्छामि, विनाशय, वशीक्रियते, विनश्यति** |
|---|

(क) विद्धि ..............................................।

(ख) मन्ये ..............................................।

(ग) शक्नोति ..............................................।

(घ) गृह्यते ..............................................।

(ङ) प्रणश्यति ..............................................।

(च) चरति ..............................................।

(छ) संजायते ..............................................।

(ज) प्रजहि ..............................................।

**उत्तराणि–** (क) जानीहि (ख) अवगच्छामि (ग) अर्हति (घ) वशीक्रियते (ङ) विनश्यति
(च) करोति (ख) उद्भवति (ज) विनाशय।

**10. अधोलिखितसम्बोधनपदानां स्थाने प्रथमाविभक्तेः एकवचनान्तं रूपं लिखत–**

| **सम्बोधने** | **प्रथमा एकवचने** |
|---|---|
| **यथा–** संगीते! | संगीता |
| रवे! | रविः |
| (क) भरतर्षभ! | .................................... |
| (ख) महाबाहो! | .................................... |
| (ग) वार्ष्णेय! | .................................... |
| (घ) कौन्तेय! | .................................... |

**उत्तराणि–**(क) भरतर्षभः (ख) महाबाहुः (ग) वार्ष्णेयः (घ) कौन्तेयः।

## योग्यता-विस्तारः
## (न परीक्षाकृते)

**(क) ग्रन्थ-परिचयः**

**श्रीमद्भगवद्गीता नाम ग्रन्थः महाभारतस्य भीष्मपर्वणः एव अंशः। अस्मिन् ग्रन्थे अष्टादश-अध्यायाः सप्तशतं च श्लोकाः सन्ति। अस्य उपदेशाः सार्वकालिकाः सार्वभौमिकाः च। संसारस्य प्रायः सर्वासु भाषासु अस्य अनुवादाः रूपान्तराणि च लभ्यन्ते।**

**हिन्दी अनुवाद (Hindi Translation)–**श्रीमद्भगवद्गीता नाम का ग्रंथ **महाभारत** के **भीष्मपर्व** का ही अंश है। इस ग्रंथ में अट्ठारह अध्याय और सात सौ श्लोक हैं। गीता के उपदेश सार्वकालिक व सार्वभौमिक हैं। संसार की प्रायः सभी भाषाओं में इसके अनुवाद और रूपांतर प्राप्त होते हैं।

**(ख) भावविस्तारः**

**I. गीतायाः महत्त्वम् एभिः श्लोकैः ज्ञायते–**

गीता सुगीता कर्तव्या किमन्यैः शस्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता॥1॥
सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥2॥
मल-निर्मोचनं पुंसां जलस्नानं दिने दिने।
सकृद् गीतामृतस्नानं संसारमलनाशनम्॥3॥

**हिंदी अनुवाद (Hindi Translation)–**गीता का महत्त्व इन श्लोकों से ज्ञात होता है–

गीता का ही गान करना चाहिए, अन्य शास्त्रों में जाने से क्या लाभ? जो स्वयं भगवान विष्णु के मुख कमल से निकली है।

सभी उपनिषद् गायें हैं। गोपाल श्रीकृष्ण इसके दुहने वाले हैं। अर्जुन बछड़े के समान है। विद्वान पुरुष इसका भोग करने वाले हैं। यह गीतारूपी दूध अमृत के समान है।

मनुष्य अपनी मलिनता दूर करने के लिए दिन में बार-बार जल से स्नान करते हैं। गीतारूपी अमृत में स्नान संसार के सभी मलों का विनाशक है।

**II. गीतायां गुणानां त्रिधा विभागः कृतः–**

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबधनन्ति महाबाहो देहे देहिनमव्ययम्॥

गुणाः त्रयः–1. सत्त्वम् 2. रजः 3. तमः।

**हिंदी अनुवाद (Hindi Translation)–**गीता में गुण तीन प्रकार के कहे गए हैं–

सत्त्व, रजस् तथा तमस्। ये गुण प्रकृति से उत्पन्न हैं जो देह में अव्यय देही (आत्मा) को बाँध लेते हैं।

1. **सत्त्वगुणः** तत्र सत्त्वं निर्मलत्वात्प्रकाशकम् अनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥

**सात्त्विकः**

| | |
|---|---|
| आहाराः | आयुः-सत्त्व-बल-आरोग्य-प्रीतिविवर्धनाः। |
| यज्ञः | अफलार्थिभिः विधिपूर्वकं क्रियते। |
| तपः | शरीरं तपः, वाङ्मयं तपः, मानसं तपः। |
| दानम् | देशकाल-पात्रानुसारं सुपात्राय दीयते। |
| बुद्धिः | यम-नियम-श्रद्धा-भक्तिमयी। |

www.dreamtopper.in

**हिंदी अनुवाद (Hindi Translation)**

| | | |
|---|---|---|
| **सात्त्विक** | आहार | आयु-सत्त्व-बल-नीरोगता-प्रीति को बढ़ाने वाले। |
| | यज्ञ | फल न चाहते हुए विधिपूर्वक किया जाता है। |
| | तप | शारीरिक तप, वाणी का तप, मानसिक तप। |
| | दान | जो देश, काल, पात्रों के अनुसार सुपात्र को दिया जाता है। |
| | बुद्धि | यम-नियम-श्रद्धा-भक्तिमयी। |

2. **रजोगुण:** रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्।।

| | | |
|---|---|---|
| **राजसिक:** | आहारा: | कटु-आम्ल-लवण-तीक्ष्ण-रूक्ष-विदाहिन:। |
| | यज्ञ: | यत् फलम् उद्दिश्य दम्भार्थं क्रियते। |
| | तप: | सत्कारमानपूजार्थं दम्भेन क्रियते। |
| | दानम् | प्रत्युपकारार्थम् फलेच्छया दीयते। |
| | बुद्धि: | धर्मम् अधर्मं, कार्यम् अकार्यं सम्यक् न जानाति। |

**हिंदी अनुवाद (Hindi Translation)**

| | | |
|---|---|---|
| **राजसी** | आहार | कड़वे, खट्टे, नमकीन, तीखे, रूखे, जलाने वाले। |
| | यज्ञ | जो फल को ध्यान में रखकर अभिमान के लिए किया जाए। |
| | तप | सत्कार, मान व पूजा के लिए दंभ से किया जाता है। |
| | दान | जो प्रत्युपकार के लिए प्राप्त करने की इच्छा से दिया जाए। |
| | बुद्धि | जो धर्म-अधर्म, कार्य-अकार्य को ठीक तरह नहीं जानती। |

3. **तमोगुण:** तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत।।

| | | |
|---|---|---|
| **तमोगुण:** | आहारा: | उच्छिष्टा:, पर्युषिता:, अमेध्या:, गतरसा:। |
| | यज्ञ: | मन्त्रहीन:, अन्न-दान-हीन:, अदक्षिण:। |
| | तप: | परेषां विनाशाय। |
| | दानम् | अदेशकाले अपात्रेभ्य: |
| | बुद्धि: | प्रमाद-मूढता-आलस्य-मोह-अज्ञानमयी। |

**हिंदी अनुवाद (Hindi Translation)**

| | | |
|---|---|---|
| **तामसी** | आहार | जूठा, बासी, अशुद्ध, रसहीन। |
| | यज्ञ | मन्त्र-अन्न दान व दक्षिणा से रहित। |
| | तप | दूसरों के विनाश के लिए जो किया जाए। |
| | दान | जो अनुचित स्थान पर अनुचित व्यक्तियों को दिया जाए। |
| | बुद्धि | आलस्य-मूढता-मोह व अज्ञान से युक्त। |

**(ख) III. उपर्युक्तगुणविश्लेषणं पठित्वा अधोलिखितान् प्रश्नान् (✓) चिह्नेन चिह्नी कुरुत।**

1. केन प्रवृत्त: नर: पुण्यम् आचरति? (क) रजोगुणेन

www.dreamtopper.in

(ख) तमोगुणेन
(ग) सत्त्वगुणेन

2. कीदृश: आहार: सात्विक:?
(क) कटु-तीक्ष्ण-रूक्ष-विदाही
(ख) आयु:-सत्त्व-बल-प्रीतिवर्धक:
(ग) उच्छिष्ट:, अमेध्य:, पर्युषित:

3. कीदृशी बुद्धि: सात्त्विकी?
(क) ज्ञान-भक्ति-श्रद्धामयी
(ख) प्रमाद-मूढता-आलस्यमयी
(ग) लोभ-मोह-क्रोधमयी

4. किं वाङ्मयं तप: उच्यते?
(क) यत् सत्कारमानपूजार्थं क्रियते।
(ख) यत् परेषां विनाशाय क्रियते।
(ग) यत् अनुद्वेगकरं सत्यं प्रियहितं च।

5. किं सात्विकं दानं कथ्यते?
(क) यत् फलेच्छया दीयते।
(ख) यत् देश-काल-पात्रानुसारं दीयते।
(ग) यत् आदेशकाले अपात्रेभ्य: दीयते।

6. कीदृशी वाणी सात्त्विकी?
(क) सत्य-माधुर्य-निष्ठामयी
(ख) परनिन्दा-असत्यमयी
(ग) क्रूर-अपशब्दयुता

**उत्तराणि–**

1. (ग) सत्त्वगुणेन (✓)
2. (ग) आयु:-सत्त्व-बल-प्रीतिवर्धक: (✓)
3. (ग) ज्ञान-भक्ति-श्रद्धामयी (✓)
4. (ग) यत् अनुद्वेगकरं सत्यं प्रियहितं च। (✓)
5. (ग) यत् देश-काल-पात्रानुसारं दीयते। (✓)
6. (ग) सत्य-माधुर्य-निष्ठामयी (✓)

**(ग) समानार्थकसूक्तय:**

1. इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मन:।
2. मन: एव मनुष्याणां कारणं बन्धमोक्षयो:।
3. सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
4. त्रिविधं नाशनमात्मन:। काम: क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।
5. जहि शत्रुं महाबाहो कामरूपं दुरासदम्।

**हिंदी अनुवाद (Hindi Translation)**

1. इन्द्रियाँ बहुत चंचल होती हैं जो बलात् मन को वश में कर लेती हैं।
2. मन ही मनुष्यों के बंधन व मोक्ष का कारण है।
3. मन को वश में करके सभी कार्य किए जा सकते हैं।
4. काम, क्रोध तथा लोभ ये तीनों व्यक्ति को नष्ट करने वाले हैं, अत: इन्हें त्याग देना चाहिए।
5. कामरूपी भयंकर शत्रु को नष्ट करें।

**भाषाविस्तार:**

**(क) 'एय' (ढक्) प्रत्यय: अपत्यार्थे प्रयुज्यते। यथा विनतताया: पुत्र: वैनतेय: (गरुड:) 'एय' प्रत्यययोगेन शब्दानां निर्माणं पश्यत।**

**यथा–** 1. गङ्गाया: पुत्र: = गाङ्गेय:

www.dreamtopper.in

2. कुन्त्याः पुत्रः = कौन्तेयः
3. वृष्णेः अपत्यं पुमान् = वार्ष्णेयः
4. भगिन्याः पुत्र = भागिनेयः
5. राधायाः पुत्रः = राधेयः

**हिंदी अनुवाद (Hindi Translation)**–संतान अर्थ में 'एय्' (ठक्) प्रत्यय का प्रयोग होता है। जैसे–विनता का पुत्र वैनतेय (गरुड़) जैसे–

1. गंगा का पुत्र = गाङ्गेय
2. कुन्ती का पुत्र = कौन्तेय
3. वृष्टि का पुत्र = वार्ष्णेय
4. बहन का पुत्र = भागिनेय
5. राधा का पुत्र = राधेय

**(ख) 'मनः' पदे मूलशब्दः, 'मनस्' इति वर्तते।**

'मनस'-'पयस्'-'तपस्'-शब्दाः नपुंसकलिङ्गाः सन्ति। मनसः विशेषणपदानि अपि नपुंसकलिङ्गे सन्ति।

**यथा**– चञ्चलं मनः
दृढं मनः
दुर्निग्रहं मनः

**हिंदी अनुवाद (Hindi Translation)**–मनः मनः शब्द में मूल शब्द मनस् है। मनस्-पयस्-तपस् ये शब्द नपुंसकलिंग में होते हैं। मन के विशेषण शब्द भी नपुंसकलिंग में होते हैं। जैसे–

चंचलं मनः
दृढम् मनः
दुर्निग्रहं मनः

## 'मनस्' (मन) नपुंसकलिङ्गे

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| प्रथमा | मनः | मनसी | मनांसि |
| द्वितीया | मनः | मनसी | मनांसि |
| तृतीया | मनसा | मनोभ्याम् | मनोभिः |
| चतुर्थी | मनसे | मनोभ्याम् | मनोभ्यः |
| पञ्चमी | मनसः | मनोभ्याम् | मनोभ्यः |
| षष्ठी | मनसः | मनसोः | मनसाम् |
| सप्तमी | मनसि | मनसोः | मनस्सु |
| सम्बोधन | हे मन! | हे मनसी! | हे मनांसि! |

**अनुरूपशब्दा**–पयस! (जल), तपस् (तपस्या), तमस् (अंधकार), वचस् (वचन), सरस् (तालाब), यशस् (यश), नभस् (आकाश), रजस् (धूलि)।

**हिंदी अनुवाद (Hindi Translation)**–**अनुरूपशब्द**–पयस् (जल), तपस् (तपस्या), तमस् (अंधकार), वचस् (वचन), सरस् (तालाब), यशस् (यश), नभस् (आकाश), रजस् (धूलि)।

(ग) कोष्ठकप्रदत्तधातुभिः सह 'तुमुन्' प्रत्ययं योजयित्वा निर्मित-पदानि ध्यानेन पश्यत अवगच्छत च।

'शक्' धातोः पूर्वं 'तुमुन्' प्रत्ययस्य प्रयोगः द्रष्टव्यः

**यथा**– (*i*) क्रोधी गुरुजनोपदेशं श्रोतुं न शक्नोति।
(*ii*) देशभक्ताः एव राष्ट्रं सेवितुं शक्नुवन्ति।

1. संयमी क्रोधोद्वेगं **सोढुं** शक्नोति। (सह्)
2. अहम् अभ्यासेन मनः **रोद्धुं** शक्नोमि। (रुध्)
3. कामेन वशीभूतः नरः पापम् **चरितुं** शक्नोति। (चर्)
4. इन्द्रियाणां निग्रहेण नरः कामं **हन्तुं** शक्नोति। (हन्)
5. इन्द्रियनिग्रहस्य अभ्यासेन जनाः मनः वशी **कर्तुं** शक्नुवन्ति। (कृ)
6. बुद्धेः नाशः **नाशयितुं** शक्नोति। (नाशय्)

**हिंदी अनुवाद (Hindi Translation)**–मनस् शब्द के अनुरूप चलने वाले शब्द हैं–पयस् (जल), तपस् (तपस्या), तमस् (अन्धकार), वचस् (वचन), सरस् (तालाब), यशस् (यश), नभस् (आकाश), रजस् (धूलि)।

(ग) कोष्ठक में दी गई धातुओं के साथ तुमुन् प्रत्यय जोड़कर बने हुए शब्दों को ध्यान से देखिए ओर समझिए। **'शक्'** धातु से पहले तुमुन् प्रत्यय का प्रयोग देखिए।

जैसे– (*i*) क्रोधी गुरुओं के उपदेश नहीं सुन सकता।
(*ii*) राष्ट्रभक्त ही देश की सेवा कर सकते हैं।

www.dreamtopper.in

# परीक्षोपयोगी अन्य महत्त्वपूर्ण प्रश्नोत्तराणि

1. (अ) अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत– 5

**ध्यायतः विषयान् पुंसः संगस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते॥**
**क्रोधाद्भवति संमोहः सम्मोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥**

**(I) एकपदेन उत्तरत–** ½ × 4 = 2

(*i*) कामः कम् जनयति? (*ii*) क्रोधात् कस्य उत्पत्तिः भवति?
(*iii*) सम्मोहात् किम् संजायते? (*iv*) नरः कस्मात् प्रणश्यति?

**(II) पूर्णवाक्येन उत्तरत–** 1 × 2 = 2

विषयेषु नरस्य सङ्ग कदा जायते?

**(III) भाषिककार्यम्–(निर्देशानुसारम् उत्तरत–)** ½ × 4 = 2

(*i*) 'ध्यायतः' पदं कस्य पदस्य विशेषणम्?
(क) विषयान् (ख) ध्यायतः (ग) पुंसः (घ) संगः

(*ii*) 'बुद्धेः नाशः' अस्य समस्तपदं लिखत।
(क) बुद्धिनाशः (ख) बुद्धिनाशात् (ग) स्मृतिभ्रंशः (घ) स्मृतिविभ्रमः

(*iii*) 'अभिजायते' इति क्रियापदस्य कर्ता कः?
(क) कामः (ख) क्रोधः (ग) कामात् (घ) सङ्गात्

(*iv*) 'सङ्गः तेषु उपजायते' अत्र 'तेषु' सर्वनामपदं केभ्यः प्रयुक्तम्?
(क) सम्मोहेभ्यः (ख) क्रोधेभ्यः (ग) कामेभ्यः (घ) विषयेभ्यः

**उत्तराणि– (I)** (*i*) क्रोधम् (*ii*) संमोहस्य (*iii*) स्मृतिविभ्रमः (*iv*) बुद्धिनाशात्
**(II)** विषयान् ध्यायतः नरस्य तेषु (विषयेषु) सङ्गः जायते।
**(III)** (*i*) (ग) पुंसः (*ii*) (क) बुद्धिनाशः (*iii*) (क) क्रोधः (*iv*) (घ) विषयेभ्यः

(आ) अधोलिखितं श्लोकं पठित्वा तदधः प्रदत्तप्रश्नानि उत्तरत– 5

**अर्जुनः उवाच–**
**चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद् दृढम्।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥**
नायम् चिरं परिक्लेशम् अनुभवितुम् अर्हति। अतः प्रयतिष्ये चक्षुषोऽस्य पुनः प्रत्यारोपणाय इति।

**(I) एकपदेन उत्तरत–** ½ × 2 = 1

(*i*) चञ्चलं किम् अस्ति? (*ii*) मनसः निग्रहः कस्य इव दुष्करः?

**(II) पूर्णवाक्येन उत्तरत–** 1 × 2 = 2

अस्मिन् श्लोके अर्जुनः कम् सम्बोधयति?

**(III) भाषिककार्यम्–** ½ × 4 = 2

(*i*) 'मथनशीलम्' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?
(क) प्रमथि (ख) प्रमाथि (ग) दृढम् (घ) बलवद्

(*ii*) 'तस्य' इति सर्वनामपदम् कस्मै प्रयुक्तम्?
(क) मनाय (ख) मनोभ्यः (ग) मनेभ्यः (घ) मनसे

(*iii*) 'अहम्' इति कर्तृपदस्य क्रियापदम् किमस्ति?
(क) निग्रहं (ख) तस्य (ग) मन्ये (घ) प्रमाथि

(*iv*) 'स्थिरम्' इत्यस्य पदस्य कः विपर्ययः श्लोके आगतः?
(क) चञ्चलं (ख) प्रमाथि (ग) दृढम् (घ) बलवत्

**उत्तराणि– (I)** (*i*) मनः (*ii*) वायोः
**(II)** अस्मिन् श्लोके अर्जुनः श्रीकृष्णम् सम्बोधयति।
**(III)** (*i*) (ख) प्रमाथि (*ii*) (घ) मनसे (*iii*) (ग) मन्ये (*iv*) (क) चञ्चलं।

2. **अधोलिखितश्लोकानाम् अन्वयं मञ्जूषायाः सहायतया उचित-क्रमेण पूरयत–** 6

**(क) शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।**
**कामक्रोधोद्भवं वेगं, स युक्तः स सुखी नरः॥** ½ × 4 = 2

**अन्वयः–**यः शरीरविमोक्षणात् (*i*) .................... कामक्रोधोद्भवं (*ii*) .................... इह एव सोढुम् (*iii*) .................... , सः (*iv*) .................... युक्तः सः सुखी (भवति)।

**मञ्जूषा–** वेगम्, शक्नोति, नरः, प्राक्

**उत्तराणि–**(*i*) प्राक् (*ii*) वेगम् (*iii*) शक्नोति (*iv*) नरः।

**(ख) काम एष क्रोध एष रजोगुणसमुद्भवः।**
**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥** ½ × 4 = 2

**अन्वयः–**एष (*i*) .................... एषः क्रोधः रजोगुणसमुद्भवः (अस्ति)। महाशनः (*ii*) .................... (च अस्ति) (*iii*) .................... इह (*iv*) .................... विद्धि।

**मञ्जूषा–** महापाप्मा, वैरिणम्, कामः, एनम्

**उत्तराणि–**(*i*) कामः (*ii*) महापाप्मा (*iii*) एनम् (*iv*) वैरिणम्।

www.dreamtopper.in

**(ग) अथ केनं प्रयुक्तोऽयं पापं चरति पूरुषः।**
**अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥** ½ × 4 = 2

**अन्वयः**–(*i*) ..................! अथ अयं पुरुषः बलात् (*ii*) .................. इव (*iii*) .................. अपि केन (*iv*) .................. पापं चरति।

**मञ्जूषा**– | प्रयुक्तः, नियोजितः, वार्ष्णेय! अनिच्छन् |

**उत्तराणि**–(*i*) वार्ष्णेय! (*ii*) नियोजितः (*iii*) अनिच्छन् (*iv*) प्रयुक्तः।

**(घ) चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम्?**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥** ½ × 4 = 2

**अन्वयः**–कृष्ण! मनः हि (*i*) .................. बलवद् दृढम्। (*ii*) .................. तस्य निग्रहम् (*iii*) .................. इव (*iv*) .................. मन्ये॥

**मञ्जूषा**– | अहम्, चञ्चलम्, सुदुष्करम्, वायोः |

**उत्तराणि**–(*i*) चञ्चलम् (*ii*) अहम् (*iii*) वायोः (*iv*) सुदुष्करम्।

**(ङ) तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।**
**पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥** ½ × 4 = 2

**अन्वयः**- (*i*) .................. तस्मात् त्वम् (*ii*) .................. इन्द्रियाणि नियम्य (*iii*) .................. एनम् पाप्मानम् हि (*iv*) ..................।

**मञ्जूषा**– | प्रजहि, ज्ञानविज्ञाननाशनम्, भरतर्षभ, आदौ |

**उत्तराणि**–(*i*) भरतर्षभ (*ii*) आदौ (*iii*) ज्ञानविज्ञाननाशनम् (*iv*) प्रजहि।

**3. अधोलिखितपंक्तिषु स्थूलाक्षरपदानाम् प्रसङ्गानुसारम् शुद्धम् अर्थं चिनुत–** 1 × 4 = 4

(*i*) पाप्मानं **प्रजहि** हये ज्ञानविज्ञाननाशनम्।
(क) त्यज (ख) मारय (ग) उत्पादय (घ) जानीहि

(*ii*) क्रोधाद् भवति **संमोहः**।
(क) मूर्च्छा (ख) मूर्खः (ग) किंकर्त्तव्यविमूढता (घ) मोहः

(*iii*) अनिच्छन्नपि **वार्ष्णेय** बलादिव नियोजितः।
(क) अर्जुन (ख) कौरव (ग) वसुदेव (घ) कृष्ण

(*iv*) तस्याहं निग्रहं मन्ये वायोरिव **सुदुष्करम्**।
(क) कठिनम् (ख) सरलम् (ग) सुकरम् (घ) असम्भवम्

**उत्तराणि**–(*i*) (ख) मारय (*ii*) (ग) किंकर्त्तव्यविमूढता (*iii*) (घ) कृष्ण (*iv*) (क) कठिनम्।

**4. अधोलिखितकथनेषु रेखाङ्कित पदानि आधृत्य उदाहरणानुसारम् प्रश्ननिर्माणम् कुरुत–** 1 × 4 = 4

(*i*) कामः सङ्गात् सञ्जायते।
(क) कुत्र (ख) कस्मात् (ग) कः (घ) कस्मिन्

(*ii*) कामः ज्ञानस्य विज्ञानस्य च नाशं करोति?
(क) कः (ख) कुतः (ग) कुत्र (घ) कम्

(*iii*) कामस्य नाशाय इन्द्रियाणि वशे करणीयानि।
(क) के (ख) काः (ग) कानि (घ) कति

(*iv*) मनसः निग्रहं वायोः इव दुष्करम्।
(क) कः (ख) कस्य (ग) कस्याः (घ) कस्मात्

**उत्तराणि**–(*i*) (ख) कस्मात् (*ii*) (क) कः (*iii*) (ग) कानि (*iv*) (ख) कस्य

**5. अधोलिखित श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत–** 1 × 4 = 4

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ!
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥

**अन्वयः**–भरतर्षभ! (*i*) .................. त्वम् हि (*ii*) .................. इन्द्रियाणि नियम्य (*iii*) .................. एनं पाप्मानं (*iv*) .................. ।

**उत्तराणि**–(*i*) तस्मात् (*ii*) आदौ (*iii*) ज्ञानविज्ञाननाशनम् (*iv*) प्रजहि

**6. अधोलिखित पद्यांशः भावार्थम् उपयुक्तपदैः पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत–** 1 × 4 = 4

असंशयं महाबाहो! मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते॥

**भावार्थ**–महाबाहो अर्जुन! निस्सन्देहं (*i*) .................. चञ्चलम् अस्ति। अस्य उपरि (*ii*) .................. कठिनं परन्तु इदं (*iii*) .................. (*iv*) .................. च वशे आयाति।

**उत्तराणि**–(*i*) मनः (*ii*) नियन्त्रणं (*iii*) अभ्यासेन (*iv*) वैराग्येण

**7. अधोलिखितानि पदानि पठित्वा तेषाम् विपर्ययं चित्वा लिखत–** ½ × 10 = 5

| पदानि | विपर्ययाः |
|---|---|
| (*i*) पुरुषः | (1) मित्रम् |

www.dreamtopper.in

| | |
|---|---|
| (*ii*) वार्ष्णेय! | (2) स्थिरम् |
| (*iii*) वैरिणम् | (3) दुर्योधन! |
| (*iv*) सोढुम् | (4) वैराग्य: |
| (*v*) पुंस: | (5) बलराम! |
| (*vi*) संमोह: | (6) शरीर: |
| (*vii*) आदौ | (7) सरलम् |
| (*viii*) भरतर्षभ! | (8) पशो: |
| (*ix*) सुदुष्करम् | (9) असोढुम् |
| (*x*) चलम् | (10) अन्ते |

**उत्तराणि–** (*i*) (6) शरीर: (*ii*) (5) बलराम! (*iii*) (1) मित्रम् (*iv*) (9) असोढुम्
(*v*) (8) पशो: (*vi*) (4) वैराग्य: (*vii*) (10) अन्ते (*viii*) (3) दुर्योधन!
(*ix*) (7) सरलम् (*x*) (2) स्थिरम्।

## मूल्यपरक प्रश्ना: (VBQs)

**वाक्यानि पठित्वा वाक्याधारितान् प्रश्नाम् उत्तरत–**

**प्रश्ना:** (*i*) 'महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।' अस्मिन् श्लोकांशे कम् वैरिणम् कथितम्?

(*ii*) 'स युक्त: स सुखी नर:।' अत्र क्रोधं वशे कृत्वा नर: क: कथित:?

(*iii*) 'कामात्क्रोधोऽभिजायते।' अत्र वाक्ये क्रोधस्य कारणं किम् अस्ति?

(*iv*) 'बुद्धिनाशात् प्रणश्यति।' अस्मिन् श्लोकांशे मृत्यो: कारणं किम् कथितम्?

(*v*) 'अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते।' अभ्यासीन वैराग्येण च कस्य निग्रहं भवति?

**उत्तराणि–** (*i*) कामम्/क्रोधम् (*ii*) युक्त:/ सुखी (*iii*) काम: (*iv*) बुद्धिनाश: (*v*) मनस:

www.dreamtopper.in